Rishabha Gita from Bhagavata Purana

ઋષભગીતા ભાગવતમહાપુરાણાન્તર્ગતા

Document Information

Text title : RiShabhagItA bhAgavatamahApurANAntargatam

File name : RiShabhagItAbhAgavatam.itx

Category : gItA, giitaa

Location : doc_giitaa

Proofread by : Sunder Hattangadi, PSA Easwaran

Description-comments : Bhagavatam Skandha 5 adhyAya 5 and 6

Latest update : June 29, 2013, December 30, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 30, 2022

sanskritdocuments.org

ઋષભગીતા ભાગવતમહાપુરાણાન્તર્ગતા

પઞ્ચમોऽધ્યાયઃ ૫.૫

ઋષભ ઉવાચ
નાયં દેહો દેહભાજાં નૃલોકે કષ્ટાન્ કામાનર્હતે વિડ્ભુજાં યે ।
તપો દિવ્યં પુત્રકા યેન સત્ત્વંશુદ્ધ્યેદ્યસ્માદ્બ્રહ્મસૌખ્યં ત્વનન્તમ્ ॥ ૧॥

મહત્સેવાં દ્વારમાહુર્વિમુક્તેસ્તમોદ્વારં યોષિતાં સઙ્ગિસઙ્ગમ્ ।
મહાન્તસ્તે સમચિત્તાઃ પ્રશાન્તા વિમન્યવઃ સુહૃદઃ સાધવો યે ॥ ૨॥

યે વા મયીશે કૃતસૌહૃદાર્થાજનેષુ દેહમ્ભરવાર્તિકેષુ ।
ગૃહેષુ જાયાऽऽત્મજરાતિમત્સુન પ્રીતિયુક્તા યાવદર્થાશ્ચ લોકે ॥ ૩॥

નૂનં પ્રમત્તઃ કુરુતે વિકર્મ યદિન્દ્રિયપ્રીતય આપૃણોતિ ।
ન સાધુ મન્યે યત આત્મનોऽયમસન્નપિ ક્લેશદ આસ દેહઃ ॥ ૪॥

પરાભવસ્તાવદબોધજાતો યાવન્ન જિજ્ઞાસત આત્મતત્ત્વમ્ ।
યાવત્ક્રિયાસ્તાવદિદં મનો વૈકર્માત્મકં યેન શરીરબન્ધઃ ॥ ૫॥

એવં મનઃ કર્મવશં પ્રયુઙ્ક્તે અવિદ્યયાऽऽત્મન્યુપધીયમાને ।
પ્રીતિર્ન યાવન્મયિ વાસુદેવે ન મુચ્યતે દેહયોગેન તાવત્ ॥ ૬॥

યદા ન પશ્યત્યયથા ગુણેહાંસ્વાર્થે પ્રમત્તઃ સહસા વિપશ્ચિત્ ।
ગતસ્મૃતિર્વિન્દતિ તત્ર તાપાનાસાદ્ય મૈથુન્યમગારમજ્ઞઃ ॥ ૭॥

પુંસઃ સ્ત્રિયા મિથુનીભાવમેતન્તયોર્મિથો હૃદયગ્રન્થિમાહુઃ ।
અતો ગૃહક્ષેત્રસુતાપ્તવિત્તૈર્જનસ્યમોહોऽયમહં મમેતિ ॥ ૮॥

યદા મનો હૃદયગ્રન્થિરસ્ય કર્માનુબદ્ધો દૃઢ આશ્લથેત ।
તદા જનઃ સમ્પરિવર્તતેऽસ્માન્મુક્તઃ પરં યાત્યતિહાય હેતુમ્ ॥ ૯॥

હંસે ગુરૌ મયિ ભક્ત્યાનુવૃત્યા વિતૃષ્ણયા દ્વન્દ્વતિતિક્ષયા ચ ।
સર્વત્ર જન્તોર્વ્યસનાવગત્યા જિજ્ઞાસયા તપસેહા નિવૃત્ત્યા ॥ ૧૦॥

મત્કર્મભિર્મત્કથયા ચ નિત્યમ્મદ્દેવસઙ્ગાદ્ગુણકીર્તનાન્મે ।
નિર્વૈરસામ્યોપશમેન પુત્રા જિહાસયા દેહગેહાત્મબુદ્ધેઃ ॥ ૧૧॥

અધ્યાત્મયોગેન વિવિક્તસેવયાપ્રાણેન્દ્રિયાત્માભિજયેન સધ્ર્યક્ ।
સચ્છ્રદ્ધયા બ્રહ્મચર્યેણ શશ્વદસમ્પ્રમાદેન યમેન વાચામ્ ॥ ૧૨॥

સર્વત્ર મદ્ભાવવિચક્ષણેન જ્ઞાનેન વિજ્ઞાનવિરાજિતેન ।
યોગેન ધૃત્યુદ્યમસત્ત્વયુક્તોલિઙ્ગં વ્યપોહેત્કુશલોઽહમાખ્યમ્ ॥ ૧૩॥

કર્માશયં હૃદયગ્રન્થિબન્ધમવિદ્યયાઽઽસાદિતમપ્રમત્તઃ ।
અનેન યોગેન યથોપદેશં સમ્યગ્વ્યપોહ્યોપરમેત યોગાત્ ॥ ૧૪॥

પુત્રાંશ્ચ શિષ્યાંશ્ચ નૃપો ગુરુર્વા મલ્લોકકામો મદનુગ્રહાર્થઃ ।
ઇત્થં વિમન્યુરનુશિષ્યાદતજ્જ્ઞાન્ન યોજયેત્કર્મસુ કર્મમૂઢાન્ ।
કં યોજયન્ મનુજોઽર્થં લભેત નિપાતયન્ નષ્ટદૃશં હિ ગર્તે ॥ ૧૫॥

લોકઃ સ્વયં શ્રેયસિ નષ્ટદૃષ્ટિર્યોઽર્થાન્ સમીહેત નિકામકામઃ ।
અન્યોન્યવૈરઃ સુખલેશહેતોરનન્તદુઃખં ચ ન વેદ મૂઢઃ ॥ ૧૬॥

કસ્તં સ્વયં તદભિજ્ઞો વિપશ્ચિદવિદ્યાયામન્તરે વર્તમાનમ્ ।
દૃષ્ટ્વા પુનસ્તં સઘૃણઃ કુબુદ્ધિં પ્રયોજયેદુત્પથગં યથાન્ધમ્ ॥ ૧૭॥

ગુરુર્ન સ સ્યાત્સ્વજનો ન સ સ્યાત્
    પિતા ન સ સ્યાજ્જનની ન સા સ્યાત્ ।
દૈવં ન તત્સ્યાન્ન પતિશ્ચ સ સ્યા-
    ન્ન મોચયેદ્યઃ સમુપેતમૃત્યુમ્ ॥ ૧૮॥

ઇદં શરીરં મમ દુર્વિભાવ્યં સત્ત્વં હિ મે હૃદયં યત્ર ધર્મઃ ।
પૃષ્ઠે કૃતો મે યદધર્મ આરાદતો હિ મામૃષભં પ્રાહુરાર્યાઃ ॥ ૧૯॥

તસ્માદ્ભવન્તો હૃદયેન જાતાઃસર્વે મહીયાંસમમું સનાભમ્ ।
અક્લિષ્ટબુદ્ધ્યા ભરતં ભજધ્વં શુશ્રૂષણં તદ્ભરણં પ્રજાનામ્ ॥ ૨૦॥

ભૂતેષુ વીરુદ્ભ્ય ઉદુત્તમા યે સરીસૃપાસ્તેષુ સબોધનિષ્ઠાઃ ।
તતો મનુષ્યાઃ પ્રમથાસ્તતોઽપિ ગન્ધર્વસિદ્ધા વિબુધાનુગા યે ॥ ૨૧॥

દેવાસુરેભ્યો મઘવત્પ્રધાના દક્ષાદયો બ્રહ્મસુતાસ્તુ તેષામ્ ।
ભવઃ પરઃ સોઽથ વિરિઞ્ચવીર્યઃ સ મત્પરોઽહં દ્વિજદેવદેવઃ ॥ ૨૨॥

ન બ્રાહ્મણૈસ્તુલયે ભૂતમન્યત્પશ્યામિ વિપ્રાઃ કિમતઃ પરં તુ ।

યસ્મિન્ નૃભિઃ પ્રહુતં શ્રદ્ધયાહમશ્નામિ કામં ન તથાગ્નિહોત્રે ॥ ૨૩॥

ધૃતા તનૂરુશતી મે પુરાણી યેનેહ સત્ત્વં પરમં પવિત્રમ્ ।
શમો દમઃ સત્યમનુગ્રહશ્ચ તપસ્તિતિક્ષાનુભવશ્ચ યત્ર ॥ ૨૪॥

મત્તોઽપ્યનન્તાત્પરતઃ પરસ્માત્સ્વર્ગાપવર્ગાધિપતેર્ન કિઞ્ચિત્ ।
યેષાં કિમુ સ્યાદિતરેણ તેષામકિઞ્ચનાનાં મયિ ભક્તિભાજામ્ ॥ ૨૫॥

સર્વાણિ મદ્ધિષ્ણ્યતયા ભવદ્ભિશ્ચરાણિ ભૂતાનિ સુતાધ્રુવાણિ ।
સમ્ભાવિતવ્યાનિ પદે પદે વો વિવિક્તદૃગ્ભિસ્તદુ હાર્હણં મે ॥ ૨૬॥

મનો વચો દૃક્કરણેહિતસ્ય સાક્ષાત્કૃતં મે પરિબર્હણં હિ ।
વિના પુમાન્ યેન મહાવિમોહાત્કૃતાન્તપાશાન્ન વિમોક્તુમીશેત્ ॥ ૨૭॥

શ્રીશુક ઉવાચ
એવમનુશાસ્યાત્મજાન્ સ્વયમનુશિષ્ટાનપિ
લોકાનુશાસનાર્થં મહાનુભાવઃપરમસુહૃ-
દ્ભગવાન્ ઋષભાપદેશ ઉપશમશીલાના-
મુપરતકર્મણાં મહામુનીનાં ભક્તિજ્ઞાન-
વૈરાગ્યલક્ષણં પારમહંસ્યધર્મમુપશિક્ષમાણઃ
સ્વતનયશતજ્યેષ્ઠં પરમભાગવતં
ભગવજ્જનપરાયણં ભરતં ધરણિપાલનાયા-
ભિષિચ્ય સ્વયં ભવન એવોર્વરિતશરીરમાત્ર-
પરિગ્રહ ઉન્મત્ત ઇવ ગગનપરિધાનઃ
પ્રકીર્ણકેશ આત્મન્યારોપિતાહવનીયો
બ્રહ્માવર્તાત્પ્રવવ્રાજ ॥ ૨૮॥

જડાન્ધમૂકબધિરપિશાચોન્માદકવદવધૂતવેષો-
ઽભિભાષ્યમાણોઽપિ જનાનાં ગૃહીતમૌનવ્રતસ્તૂષ્ણીં બભૂવ ॥ ૨૯॥

તત્ર તત્ર પુરગ્રામાકરખેટવાટખર્વટશિબિરવ્રજઘોષ-
સાર્થગિરિવનાશ્રમાદિષ્વનુપથમવનિચરાપસદૈઃ
પરિભૂયમાનો મક્ષિકાભિરિવ વનગજસ્તર્જનતાડના-
વમેહનષ્ઠીવનગ્રાવશકૃદ્રજઃપ્રક્ષેપપૂતિવાતદુરુક્તૈ-
સ્તદવિગણયન્નેવાસત્સંસ્થાન એતસ્મિન્ દેહોપલક્ષણે
સદપદેશ ઉભયાનુભવસ્વરૂપેણ સ્વમહિમાવસ્થાનેના-
સમારોપિતાહમ્મમાભિમાનત્વાદવિખણ્ડિતમનાઃ

પૃથિવીમેકચરઃ પરિબભ્રામ ॥ ૩૦॥

અતિસુકુમારકરચરણોરઃસ્થલવિપુલબાહ્વંસગલવદના-
દ્યવયવવિન્યાસઃ પ્રકૃતિસુન્દરસ્વભાવહાસસુમુખો
નવનલિનદલાયમાનશિશિરતારારુણાયતનયનરુચિરઃ
સદૃશસુભગકપોલકર્ણકણ્ઠનાસો વિગૂઢસ્મિતવદન-
મહોત્સવેન પુરવનિતાનાં મનસિ કુસુમશરાસનમુપદધાનઃ
પરાગવલમ્બમાનકુટિલજટિલકપિશકેશભૂરિભારો-
ઽવધૂતમલિનનિજશરીરેણ ગ્રહગૃહીત ઇવાદૃશ્યત ॥ ૩૧॥

યર્હિ વાવ સ ભગવાન્ લોકમિમં યોગસ્યાદ્ધા
પ્રતીપમિવાચક્ષાણસ્તત્પ્રતિક્રિયાકર્મ બીભત્સિતમિતિ
વ્રતમાજગરમાસ્થિતઃ શયાન એવાશ્નાતિ પિબતિ
ખાદત્યવમેહતિ હદતિ સ્મ ચેષ્ટમાન ઉચ્ચરિત
આદિગ્ધોદ્દેશઃ ॥ ૩૨॥

તસ્ય હ યઃ પુરીષસુરભિસૌગન્ધ્યવાયુસ્તં દેશં
દશયોજનં સમન્તાત્સુરભિં ચકાર ॥ ૩૩॥

એવં ગોમૃગકાકચર્યયા વ્રજંસ્તિષ્ઠન્નાસીનઃ શયાનઃ
કાકમૃગગોચરિતઃ પિબતિ ખાદત્યવમેહતિ સ્મ ॥ ૩૪॥

ઇતિ નાનાયોગચર્યાચરણો ભગવાન્ કૈવલ્યપતિરૃષભો-
ઽવિરતપરમમહાનન્દાનુભવ આત્મનિ સર્વેષાં ભૂતાના-
માત્મભૂતે ભગવતિ વાસુદેવ આત્મનોઽવ્યવધાના-
નન્તરોદરભાવેન સિદ્ધસમસ્તાર્થપરિપૂર્ણો યોગૈશ્વર્યાણિ
વૈહાયસમનોજવાન્તર્ધાનપરકાયપ્રવેશદૂરગ્રહણાદીનિ
યદૃચ્છયોપગતાનિ નાઞ્જસા નૃપહૃદયેનાભ્યનન્દત્ ॥ ૩૫॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
પઞ્ચમસ્કન્ધે ઋષભદેવાનુચરિતે પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

ૐ નમો ભગવતે વાસુદેવાય ।

ષષ્ઠોઽધ્યાયઃ ૫.૬

રાજોવાચ

ન નૂનં ભગવ આત્મારામાણાં યોગસમીરિતજ્ઞાનાવભર્જિત-
કર્મબીજાનાં ઐશ્વર્યાણિ પુનઃ ક્લેશદાનિ ભવિતુમર્હન્તિ
યદૃચ્છયોપગતાનિ ॥ ૧॥

ઋષિરુવાચ
સત્યમુક્તં કિન્ત્વિહ વા એકે ન મનસોઽદ્ધા વિશ્રમ્ભ-
મનવસ્થાનસ્ય શઠકિરાત ઇવ સઙ્ગચ્છન્તે ॥ ૨॥

તથા ચોક્તં -
ન કુર્યાત્કર્હિચિત્સખ્યં મનસિ હ્યનવસ્થિતે ।
યદ્વિશ્રમ્ભાચ્ચિરાચ્ચીર્ણં ચસ્કન્દ તપ ઐશ્વરમ્ ॥ ૩॥

નિત્યં દદાતિ કામસ્ય ચ્છિદ્રં તમનુ યેઽરયઃ ।
યોગિનઃ કૃતમૈત્રસ્ય પત્યુર્જાયેવ પુંશ્ચલી ॥ ૪॥

કામો મન્યુર્મદો લોભઃ શોકમોહભયાદયઃ ।
કર્મબન્ધશ્ચ યન્મૂલઃ સ્વીકુર્યાત્કો નુ તદ્બુધઃ ॥ ૫॥

અથૈવમખિલલોકપાલલલામોઽપિ
વિલક્ષણૈર્જડવદવધૂતવેષભાષાચરિતૈ-
રવિલક્ષિતભગવત્પ્રભાવો યોગિનાં
સામ્પરાયવિધિમનુશિક્ષયન્ સ્વકલેવરં
જિહાસુરાત્મન્યાત્માનમસંવ્યવહિત-
મનર્થાન્તરભાવેનાન્વીક્ષમાણ
ઉપરતાનુવૃત્તિરુપરરામ ॥ ૬॥

તસ્ય હ વા એવં મુક્તલિઙ્ગસ્ય ભગવત
ઋષભસ્ય યોગમાયાવાસનયા દેહ ઇમાં
જગતીમભિમાનાભાસેન સઙ્ક્રમમાણઃ
કોઙ્કવેઙ્કકુટકાન્ દક્ષિણકર્ણાટકાન્
દેશાન્ યદૃચ્છયોપગતઃ કુટકાચલોપવન
આસ્યકૃતાશ્મકવલ ઉન્માદ ઇવ
મુક્તમૂર્ધજોઽસંવીત એવ વિચચાર ॥ ૭॥

અથ સમીરવેગવિધૂતવેણુવિકર્ષણજાતોગ્ર-
દાવાનલસ્તદ્વનમાલેલિહાનઃ સહ તેન દદાહ ॥ ૮॥

યસ્ય કિલાનુચરિતમુપાકર્ણ્ય કોઙ્કવેઙ્કકુટકાનાં
રાજાર્હન્નામોપશિક્ષ્ય કલાવધર્મ ઉત્કૃષ્યમાણે
ભવિતવ્યેન વિમોહિતઃ સ્વધર્મપથમકુતોભયમપહાય
કુપથપાખણ્ડમસમઞ્જસં નિજમનીષયા મન્દઃ
સમ્પ્રવર્તયિષ્યતે ॥ ૯॥

યેન હ વાવ કલૌ મનુજાપસદા દેવમાયામોહિતાઃ
સ્વવિધિનિયોગશૌચચારિત્રવિહીનાદેવહેલના-
ન્યપવ્રતાનિ નિજનિજેચ્છયા ગૃહ્ણાના અસ્નાના-
નાચમનાશૌચકેશોલ્લુઞ્ચનાદીનિ કલિનાધર્મબહુલેનો-
પહતધિયો બ્રહ્મબ્રાહ્મણયજ્ઞપુરુષલોકવિદૂષકાઃ
પ્રાયેણ ભવિષ્યન્તિ ॥ ૧૦॥

તે ચ હ્યર્વાક્તનયા નિજલોકયાત્રયાન્ધપરમ્પરયા-
ઽઽશ્વસ્તાસ્તમસ્યન્ધે સ્વયમેવ પ્રપતિષ્યન્તિ ॥ ૧૧॥

અયમવતારો રજસોપપ્લુતકૈવલ્યોપશિક્ષણાર્થઃ ॥ ૧૨॥

તસ્યાનુગુણાન્ શ્લોકાન્ ગાયન્તિ -
અહો ભુવઃ સપ્તસમુદ્રવત્યા દ્વીપેષુ વર્ષેષ્વધિપુણ્યમેતત્ ।
ગાયન્તિ યત્રત્યજના મુરારેઃકર્માણિ ભદ્રાણ્યવતારવન્તિ ॥ ૧૩॥

અહો નુ વંશો યશસાવદાતઃ પ્રૈયવ્રતો યત્ર પુમાન્ પુરાણઃ ।
કૃતાવતારઃ પુરુષઃ સ આદ્યશ્ચચાર ધર્મં યદકર્મહેતુમ્ ॥ ૧૪॥

કો ન્વસ્ય કાષ્ઠામપરોઽનુગચ્છેન્મનોરથેનાપ્યભવસ્ય યોગી ।
યો યોગમાયાઃ સ્પૃહયત્યુદસ્તાહ્યસત્તયા યેન કૃતપ્રયત્નાઃ ॥ ૧૫॥

ઇતિ હ સ્મ સકલવેદલોકદેવબ્રાહ્મણગવાં
પરમગુરોર્ભગવત ઋષભાખ્યસ્ય વિશુદ્ધાચરિતમીરિતં
પુંસાં સમસ્તદુશ્ચરિતાભિહરણં પરમમહામઙ્ગલાયન-
મિદમનુશ્રદ્ધયોપચિતયાનુશૃણોત્યાશ્રાવયતિ વાવહિતો
ભગવતિ તસ્મિન્ વાસુદેવ એકાન્તતો ભક્તિરનયોરપિ
સમનુવર્તતે ॥ ૧૬॥

યસ્યામેવ કવય આત્માનમવિરતં વિવિધવૃજિનસંસાર-
પરિતાપોપતપ્યમાનમનુસવનં સ્નાપયન્તસ્તયૈવ પરયા

નિર્વૃત્યા હ્યપવર્ગમાત્યન્તિકં પરમપુરુષાર્થમપિ
સ્વયમાસાદિતન્નો એવાદ્રિયન્તે ભગવદીયત્વેનૈવ
પરિસમાપ્તસર્વાર્થાઃ ॥ ૧૭॥

રાજન્ પતિર્ગુરુરલં ભવતાં યદૂનાં
દૈવં પ્રિયઃ કુલપતિઃ ક્વ ચ કિઙ્કરો વઃ ।
અસ્ત્વેવમઙ્ગ ભગવાન્ ભજતાં મુકુન્દો
મુક્તિં દદાતિ કર્હિચિત્સ્મ ન ભક્તિયોગમ્ ॥ ૧૮॥

નિત્યાનુભૂતનિજલાભનિવૃત્તતૃષ્ણઃ
શ્રેયસ્યતદ્રચનયા ચિરસુપ્તબુદ્ધેઃ ।
લોકસ્ય યઃ કરુણયાભયમાત્મલોક-
માખ્યાન્નમો ભગવતે ઋષભાય તસ્મૈ ॥ ૧૯॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
પઞ્ચમસ્કન્ધે ઋષભદેવાનુચરિતે ષષ્ઠોઽધ્યાયઃ ॥ ૬॥

Proofread by Sunder Hattangadi, PSA Easwaran

Rishabha Gita from Bhagavata Purana
pdf was typeset on December 30, 2022

Please send corrections to *sanskrit@cheerful.com*